ब्रह्महा युध्यतेऽयुद्धो देहं त्यक्त्वा रणाजिरे ।
न युद्धी रणभयानां कृते कश्चिन्महापथात् ॥
संग्रामे युध्यतो लक्ष्मीः कीर्त्तिः स्यात् स्वर्गतिस्तथा ।
भयस्य तेऽपि नश्यन्ति महासत्वान्महारणात् ॥
तस्मात् सत्येन यत्किञ्चित् क्रियते तच्छुभप्रदम् ।
यज्ञं दानं व्रतं वापि संग्रामे नृपसत्तम ! ॥"
इत्यादि वह्निपुराणे संग्रामप्रशंसा ॥ * ॥
अथ युद्धनिर्णयः ।
"यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः ।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः ॥
आक्रोदये विग्रहीयात् चोभौ नात्मबलौ यदि ।
अस्तने च प्रहर्त्तव्यं शत्रौ न तु विपर्य्यये ॥
स्वयं राज्ञा न योद्धव्यं येऽपि शस्त्रास्त्रकोविदाः ।
मत्ता युद्धेषु इच्छन्ति शक्तेभ्यः शक्तिमत्तराः ॥
रथयुद्धं समे देशे विषमे हस्तिसङ्करः ।
अश्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे ॥
जलाये सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते ।
संहत्य योधयेदल्पान् कामं विस्तारयेद्बहून् ॥
सूचीमुखमनीकं स्यादल्पं हि बहुभिः सह ।
अपि पञ्चाशतः शूरान् निघ्नन्ति परवाहिनीम् ।
येऽपि वा पञ्चषट्सप्तसहिताः कृतनिश्चयाः ॥"
अथ युद्धासननिर्णयः ।
"अन्यद्वारा विपक्षस्तु विग्रहासनमुच्यते ।
अरिं विगृह्य वा स्थानं विग्रहासनमुच्यते ॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः ।
सन्धाय यदवस्थानं सन्धायासनमुच्यते ॥
उदासीने मध्यमे वा समाने प्रतिशङ्कया ।
एकीभूय अवस्थानं सम्भूयासनमुच्यते ॥
सर्व्वेषां प्रीतिजननं निजराष्ट्रस्य लक्षणम् ।
एतत् प्रीत्यासनं नाम सर्व्वासनमहत्तरम् ॥"
अथ दुर्गयुक्तिः ।
"राज्ञो बलं नहि बलं दुर्गमेव बलं बलम् ।
अप्यल्पबलवान् राजा श्रियो दुर्गबलाद्भवेत् ॥"
तथा च ।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते ॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत् ॥
यद्देवसुचितं दुर्गं गिरिनद्यादिसंश्रयम् ।
अकृत्रिममियं ज्ञेयं दुर्लङ्घमरिभूभुजाम् ॥
प्राकारपरिखादिमत्संश्रयं यद्भवेदिह ।
कृत्रिमं नाम विज्ञेयं लङ्घ्यालङ्घ्यन्तु वैरिणाम् ॥"
अथाकृत्रिमदुर्गयुक्तिः ।
"अत्युच्चविस्तीर्णगिरा दुरारोहः सकाननः ।
सजलाश्रयसम्भारभोज्यद्रव्यसमाश्रयः ॥
सुखनिःसरणो दुर्गः पर्व्वताख्यो महीभुजाम् ।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः ॥
तन्मध्ये भूप्रदेशो यो नदीदुर्गः स उच्यते ।
यदात्यचिरकालीनं दुर्लङ्घ्यविपिनादिकम् ।
तन्मध्यरचिता भूमिर्दुर्गत्वेनोपतिष्ठते ।
वनदुर्गमिति ख्यातं यथापूर्व्वं महत्तरम् ॥"

कृत्रिमदुर्गयुक्तिर्यथा,—
"यस्मिन्नार्ध्ये गिरिर्नास्ति नद्यो वा गहनोदकाः ।
तस्य मध्ये महीपालः कृत्रिमं दुर्गमारभेत् ॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः ।
दुर्गत्वेन समादिष्टाः परिखा बहुयादसः ॥
विशालशालं सुघनं बहुकण्टकि सङ्कटम् ।
दुर्गत्वेन समादिष्टं विस्तीर्णं विषमं वनम् ॥
अधोऽधो बध्यमानोऽपि कन्दरीऽल्पजलं स्रवन् ।
दुर्गत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम् ॥
सर्व्वतः परिखां कृत्वा निबन्धोपरि कन्दरम् ।
सजलप्लुतदेशत्वाज्जलदुर्गं तदुच्यते ॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धना ।
वर्षास्वपगते वारि जलदुर्गं ततो भवेत् ॥
एतयोरपि संमिश्रात् संमिश्रं दुर्गमाचरेत् ।
आश्रित्य कृत्रिमं दुर्गं बलवद्वैरिणो दिशि ॥
अन्यत्र कृत्रिमं दुर्गं कृत्वा नरपतिर्विशेत् ।
रथपतिर्यदा वैरी स्थलदुर्गं तदाचरेत् ॥
गजाश्वनाथश्चेद्वैरी जलदुर्गं तदाचरेत् ।
गिरिदुर्गं नृपः सेवेत् यस्य स्यादुभिधो रिपुः ॥
सर्व्वं हि त्रिविधं युद्धं समासादुपादिश्यते ।
प्रतिराजस्य राज्यान्तं प्रकटं गुप्त एव च ॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम् ।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः ॥"
अथ सामान्यतो गुणाः । तथा हि नीतिशास्त्रम् ।
"सप्रवेशापसरणं दुर्गसत्तममुच्यत ।
अन्यच्च वन्दिशालेव न तादृगबहुमाश्रयेत् ॥
धनुर्दुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गसंसर्गं वनदुर्गञ्च तानि षट् ॥"
अन्ये तु ।
"न दुर्गं दुर्गमित्याहुर्योद्धृदुर्गं प्रकीर्त्तितम् ।
योद्धृशून्यं हि यद्दुर्गं स्थलकायसमं हि तत् ॥"
अपराण्यपि ।
"यावत्प्रमाणं नगरं हि राज्ञो
ततो भवेदुत्तममध्यमान्त्यम् ।
त्रिंशञ्चलक्षादगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम् ॥"
गर्गस्तु ।
"यदन्यद्विविधं दुर्गं प्रोच्यते धरणीभुजाम् ।
तेभ्य एवातिरिच्येत मल्लदुर्गं विशेषतः ॥
अन्येषु देवाद्दिष्टेषु मल्लदुर्गाज्जयेन्नृपः ।
मल्लदुर्गे हि भिन्ने हि न चान्यत् कार्य्यकारकम् ॥
यदेव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् ।
सप्रवेशापसरणं तद्दुर्गसत्तमं विदुः ॥"
इति युक्तिकल्पतरुः ॥
तद्वैदिकपर्य्यायः । रणः १ विवाक् २ विखादः ३ नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८ पृतनाज्यम् ९ अभीके १० समीके ११ ममसत्यम् १२ नेमधिता १३ सङ्काः १४ समितिः १५ समनम् १६ मीळ्हे १७ पृतनाः १८ स्पृधः १९ मृधः २० पृत्सु २१ समत्सु २२ समर्य्ये २३ समरणे २४ समोहे २५ समिथे २६ सङ्ख्ये २७ सङ्गे २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ वृत्रतूर्य्ये ३२ पृक्षे ३३ आणौ ३४ शूरसातौ ३५ वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९ पौंस्ये ४० महाधने ४१ वाजे ४२ अज्म ४३ सद्म ४४ संयत् ४५ संवतः ४६ । इति षट्चत्वारिंशत् संग्रामनामानि । इति वेदनिघण्टौ २ । १७ ॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य ।) कार्त्तिकेयः । इति शब्दचन्द्रिका ॥ (युद्धस्य रङ्गः । युद्धस्थलम् । यथा, महाभारते । ७ । ६५ । १८ ।
"अयोध्यं अजिरे क्रुद्धाः युद्धरङ्गगता नराः ॥")

युद्धसारः, पुं, (युद्धस्य सारः ।) घोटकः । इति शब्दचन्द्रिका ॥

युध, य औ ङ युद्धे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-हनने सक०-अनिट् ।) य ङ, युध्यते । औ, योद्धा । संमुखस्थितयोर्द्वयोः सांग्रामिकरीत्या परस्पराभिभवेच्छा युद्धम् । युध्यते योधः कदाचिदेकस्य सह भावविवक्षायां युध्यते योधः परेण । कदाचिद्धननेऽपि युध्यते चौरं राजा हन्तीत्यर्थः । यो भक्तपिण्डस्य कृते न युध्येदिति अस्माद्भावे क्विपि तमिच्छतीति क्ये तं करोतीति कण्ड्वादित्वात् क्ये वा साध्यम् । इति दुर्गादासः ॥

युधानः, पुं, (युध्यतेऽसौ । युध् + "युधिबुधिदृशः किच ।" उणा० २ । ९० । इति आनच् । स च कित् ।) क्षत्रियः । इत्युणादिकोषः ॥ (रिपुः । इत्युज्ज्वलदत्तः ॥)

युधिकः, त्रि, योद्धा । युधशब्दात् ष्ठिकप्रत्ययेन निष्पन्नः ॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः । "गवियुधिभ्यां स्थिरः ।" ८ । ३ । ९५ । इति षत्वम् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) पाण्डवराजः । स कुन्तीगर्भे धर्म्माज्जातः । तत्पर्य्यायः । अजातशत्रुः २ शल्यारिः ३ धर्म्मपुत्त्रः ४ अजमीढः ५ । इति हेमचन्द्रः । ३ । ३७१ ॥ (मृगशापाभिशप्तः पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्त्रार्थमेकदा धर्म्मपत्नीं कुन्तीमुवाच । शुचिस्मिते ! अनपत्यो हि न शुभलोकार्ह इति विचिन्त्य त्वं मदुपकारार्थं केनापि पुत्त्रमुत्पादयेति । एवमुक्ता कुन्ती दृष्ट्वा च पत्युरत्यन्तातिशयं धार्म्मिकपुत्त्रलाभाय दुर्व्वासःप्रदत्तमन्त्रबलेन धर्म्ममाहूय तेन सङ्गता युधिष्ठिरं पुत्त्रमलभत । यदुक्तं महाभारते । १ । १२३ । ५—८ ।
'संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह ।
लेभे पुत्त्रं वारारोहा सर्व्वप्राणभृतां हितम् ॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे ।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते ॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी ॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ॥
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ।